# पञ्चमाध्यायस्य द्वितीयः पादः

## धान्यानां भवने क्षेत्रे खञ् । (१/१८०२)

निर्देशादेव समर्थविभक्तिः । धान्यविशेषवाचिभ्यः[1] षष्ठीसमर्थेभ्यो भवनेऽभिधेये खञ् प्रत्ययो भवति, तच्चेद् भवनं क्षेत्रं भवति । भवनम् इति भवन्ति जायन्तेऽस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रम् मौद्गीनम् । कौद्रवीणम् । [2]कौलत्थीनम् । धान्यानाम् इति किम् ? तृणानां भवनं क्षेत्रम् इत्यत्र न भवति । क्षेत्रम् इति किम् ? [3]मुद्गानां [4]भवनं कुसूलम् । बहुवचनं स्वरूपविधिनिरासार्थम् ॥

## व्रीहिशाल्योर्ढक् । (२/१८०३)

व्रीहिशालिशब्दाभ्यां ढक् प्रत्ययो भवति भवने क्षेत्रे अभिधेये । खञोऽपवादः । व्रीहीणां भवनं क्षेत्रम् व्रैहेयम्[5] । शालेयम् ॥

## यवयवकषष्टिकाद् यत् । (३/१८०४)

[6]यवादिभ्यः शब्देभ्यो यत् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये । खञोऽपवादः । यवानां भवनं क्षेत्रम् यव्यम् । [7]यवक्यम् । षष्टिक्यम् ॥

## विभाषा तिलमाषोमाभङ्गाणुभ्यः । (४/१८०५)

[8]तिल माष उमा भङ्गा अणु इत्येतेभ्यः विभाषा यत् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये । खञि प्राप्ते वचनं, पक्षे सोऽपि भवति । उमाभङ्गयोरपि धान्यत्वमाश्रितमेव । [9]तिलानां भवनं क्षेत्रम् तिल्यम्, तैलीनम् । माष्यम्, माषीणम् । उम्यम्, औमीनम् । भङ्ग्यम्, भाङ्गीनम् । अणव्यम्, आणवीनम् ॥

## सर्वचर्मणः कृतः खखञौ । (५/१८०६)

सर्वचर्मन् शब्दात् तृतीयासमर्थात् कृतः इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः । सर्वशब्दश्चात्र [10]प्रत्ययार्थेन कृतेन[11] सम्बध्यते, न चर्मणा । तत्रायमसमर्थसमासो द्रष्टव्यः । सर्वश्चर्मणा कृतः इत्येतस्मिन् वाक्यार्थे[12] वृत्तिः । सर्वचर्मीणः, सार्वचर्मीणः ॥

---

1. शब्देभ्यः इत्यधिकम् ब. ड, प्रातिपदिकेभ्यः इत्यधिकम् क. 2. कौलत्थीनम् नास्ति फ. 3. मुद्गादीनाम् क. 4. भवनः कुशूलः ब. क. ड. फ. 5. क्षेत्रम् इत्यधिकम् फ. 6. यव यवक षष्टिक इत्येतेभ्यः क. 7. यव एव यवकः । अजमोदा इत्यन्ये इत्यधिकम् फ. 8. तिलादिभ्यः शब्देभ्यः ब. क. फ. 9. तिलादीनाम् फ, तिल माष उमा भङ्गा अणु एषां भवनम् ब. क. ह. 10. प्रत्ययेनार्थेन क. 11. सह इत्यधिकम् क. 12. तद्धितवृत्तिः क.